# राहु स्तोत्रम्



https://pdffile.co.in/

# ॥ राहुस्तोत्रम् ॥

अथ राहुस्तोत्रप्रारम्भः ।

ॐ अस्य श्री राहुस्तोत्रमहामन्त्रस्य वामदेव ऋषिः ।

अनुष्टुप्च्छन्दः । राहुर्देवता ।

राहुप्रसादसिद्ध्यर्थे जपे विनियोगः ।

काश्यप उवाच ।

शृण्वन्तु मुनयः सर्वे राहुप्रीतिकरं स्तवम् ।

सर्वरोगप्रशमनं विषभीतिहरं परम् ॥ १॥

सर्वसम्पत्करं चैव गुह्यमेतदनुत्तमम् ।

आदरेण प्रवक्ष्यामि श्रूयतामवधानतः ॥ २॥

राहुः सूर्यरिपुश्चैव विषज्वाली भयाननः ।

सुधांशुवैरिः श्यामात्मा विष्णुचक्राहितो बली ॥ ३॥

भुजगेशस्तीक्ष्णदंष्ट्रः क्रूरकर्मा ग्रहाधिपः ।

द्वादशैतानि नामानि नित्यं यो नियतः पठेत् ॥ ४॥

जप्त्वा तु प्रतिमां रंयां सीसजां माषसुस्थिताम् ।

नीलैर्गन्धाक्षतैः पुष्पैः भक्त्या सम्पूज्य यत्नतः ॥ ५॥

https://pdffile.co.in/

विधिना वह्निमादाय दूर्वान्नाज्याहुतीः क्रमात्।
तन्मन्त्रेणैव जुहुयाद्यावदष्टोत्तरं शतम् ॥ ६॥

हुत्वैवं भक्तिमान् राहुं प्रार्थयेद्ग्रहनायकम् ।
सर्वापद्विनिवृत्यर्थं प्राञ्जलिः प्रणतो नरः ॥ ७

राहो कराळवदन रविचन्द्रभयङ्कर ।
तमोरूप नमस्तुभ्यं प्रसादं कुरु सर्वदा ॥ ८॥

सिम्हिकासुत सूर्यारे सिद्धगन्धर्वपूजित ।
सिंहवाह नमस्तुभ्यं सर्वान्रोगान् निवारय ॥ ९॥

कृपाणफलकाहस्त त्रिशूलिन् वरदायक ।
गरळातिगराळास्य गदान्मे नाशयाखिलान् ॥ १०॥

स्वर्भानो सर्पवदन सुधाकरविमर्दन ।
सुरासुरवरस्तुत्य सर्वदा त्वं प्रसीद मे ॥ ११॥

इति सम्प्रार्थितो राहुः दुष्टस्थानगतोऽपि वा ।
सुप्रीतो जायते तस्य सर्वान् रोगान् विनाशयेत् ॥ १२॥

https://pdffile.co.in/

विषान्न जायते भीतिः महारोगस्य का कथा ।
सर्वान् कामानवाप्नोति नष्टं राज्यमवाप्नुयात् ॥ १३॥

एवं पठेदनुदिनं स्तवराजमेतं मर्त्यः प्रसन्न हृदयो
विजितेन्द्रियो यः ।
आरोग्यमायुरतुलं लभते सुपुत्रान्सर्वे ग्रहा विषमगाः
सुरतिप्रसन्नाः ॥ १४॥

इति राहुस्तोत्रं सम्पूर्णम् ।



https://pdffile.co.in/



**PDF Created by -**

https://pdffile.co.in/

https://pdffile.co.in/